# Yoga Sutra - Level 1 - Chapter 3

Int अथ तृतीयः पादः
atha tṛtīyaḥ pādaḥ।

विभूति-पादः।
vibhūti-pādaḥ।

1 देश-बन्धः चित्तस्य धारणा।
deśa-bandhaḥ cittasya dhāraṇā।

2 तत्र प्रत्यय-एकतानता ध्यानम्।
tatra pratyaya-ekatānatā dhyānam।

3 तत् एव अर्थ-मात्र-निर्भासं स्वरूप-शून्यम् इव समाधिः।
tat eva artha-mātra-nirbhāsaṃ svarūpa-śūnyam iva samādhiḥ।

4 रयम् एकत्र संयमः।
trayam ekatra saṃyamaḥ।

5 तत्-जयात् प्रज्ञा-लोकः।
tat-jayāt prajñā-lokaḥ।

6 तस्य भूमिषु विनियोगः।
tasya bhūmiṣu viniyogaḥ।

7 त्रयम् अन्तरङ्गं पूर्वेभ्यः।
trayam antaraṅgaṃ pūrvebhyaḥ।

8 तत् अपि बहिरङ्गं निर्बीजस्य।
tat api bahiraṅgaṃ nirbījasya।

9 व्युत्थान-निरोध-संस्कारयोः अभिभव-प्रादुर्भावौ निरोध-क्षण-चित्त-अन्वयः निरोध-परिणामः।
vyutthāna-nirodha-saṃskārayoḥ abhibhava-prādurbhāvau nirodha-kṣaṇa-citta-anvayaḥ nirodha-pariṇāmaḥ।

10 तस्य प्रशान्त-वाहिता संस्कारात्।
tasya praśānta-vāhitā saṃskārāt।

11 सर्व-अर्थता-एकाग्रतयोः क्षय-उदयौ चित्तस्य समाधि-परिणामः।
sarva-arthatā-ekāgratayoḥ kṣaya-udayau cittasya samādhi-pariṇāmaḥ।

12 ततः पुनः शान्त-उदितौ तुल्य-प्रत्ययौ चित्तस्य एकाग्रता-परिणामः।
tataḥ punaḥ śānta-uditau tulya-pratyayau cittasya ekāgratā-pariṇāmaḥ।

13 एतेन भूत-इन्द्रियेषु धर्म-लक्षणा-अवस्था-परिणामाः व्याख्याताः।
etena bhūta-indriyeṣu dharma-lakṣaṇā-avasthā-pariṇāmāḥ vyākhyātāḥ।

14 शान्त-उदित-अव्यपदेश्य-धर्म-अनुपाती धर्मी।
śānta-udita-avyapadeśya-dharma-anupātī dharmī।

15 क्रम-अन्यत्वं परिणामा-अन्यत्वे हेतुः।
krama-anyatvaṃ pariṇāmā-anyatve hetuḥ।

16 परिणाम-त्रय-संयमात् अतीत-अनागत-ज्ञानम्।
pariṇāma-traya-saṃyamāt atīta-anāgata-jñānam।

17 शब्द-अर्थ-प्रत्ययानाम् इतर-इतर-अध्यासात् सङ्करः तत्-प्रविभाग-संयमात् सर्व-भूत-रुत-ज्ञानम्।
śabda-artha-pratyayānām itara-itara-adhyāsāt saṅkaraḥ tat-pravibhāga-saṃyamāt sarva-bhūta-ruta-jñānam।

18 संस्कार-साक्षात्-करणात् पूर्व-जाति-ज्ञानम्।
saṃskāra-sākṣāt-karaṇāt pūrva-jāti-jñānam।

19 परत्ययस्य पर-चित्त-ज्ञानम्।
pratyayasya para-citta-jñānam।

20 न च तत्-सालम्बनं तस्य अविषयी-भूतत्वात्।
na ca tat-sālambanaṃ tasya aviṣayī-bhūtatvāt।

21 काय-रूप-संयमात् तत्-ग्राह्य-शक्ति-स्तम्भे चक्षुः-प्रकाश-असम्प्रयोगे अन्तर्धानम्।
kāya-rūpa-saṃyamāt tat-grāhya-śakti-stambhe cakṣuḥ-prakāśa-asamprayoge antardhānam।

22 सोपक्रमं निरुपक्रमं च कर्म तत्-संयमात् अपरान्त-ज्ञानम् अरिष्टेभ्यः वा।
sopakramaṃ nirupakramaṃ ca karma tat-saṃyamāt aparānta-jñānam ariṣṭebhyaḥ vā।

23 मैत्री आदिषु बलानि।
maitrī ādiṣu balāni।

24 बलेषु हस्ति-बल-आदीनि।
baleṣu hasti-bala-aādīni।

25 प्रवृत्ति-आलोक-न्यासात् सूक्ष्म-व्यवहित-विप्रकृष्ट-ज्ञानम्।
pravṛtti-āloka-nyāsāt sūkṣma-vyavahita-viprakṛṣṭa-jñānam।

26 भुवन-ज्ञानं सूर्ये संयमात्।
bhuvana-jñānaṃ sūrye saṃyamāt।

27 चन्द्रे तारा-व्यूह-ज्ञानम्।
candre tārā-vyūha-jñānam।

28 रुवे तत्-गति-ज्ञानम्।
dhruve tat-gati-jñānam।

29 नाभि-चक्रे काय-व्यूह-ज्ञानम्।
nābhi-cakre kāya-vyūha-jñānam।

30 कण्ठ-कूपे क्षुत्-पिपासा-निवृत्तिः।
kaṇṭha-kūpe kṣut-pipāsā-nivṛttiḥ।

31 कूर्म-नाड्यां स्थैर्यम्।
kūrma-nāḍyāṃ sthairyam।

32 मूर्ध-ज्योतिषि सिद्ध-दर्शनम्।
mūrdha-jyotiṣi siddha-darśanam।

33 रातिभात् वा सर्वम्।
prātibhāt vā sarvam।

34 हृदये चित्त-संवित्।
hṛdaye citta-saṃvit।

35 सत्त्व-पुरुषयोः अत्यन्त-असङ्कीर्णयोः प्रत्यय-अविशेषः भोगः पर-अर्थत्वात् स्व-अर्थ-संयमात् पुरुष-ज्ञानम्।
sattva-puruṣayoḥ atyanta-asaṅkīrṇayoḥ pratyaya-aviśeṣaḥ bhogaḥ para-arthatvāt sva-artha-saṃyamāt puruṣa-jñānam।

36 ततः प्रातिभ-श्रावण-वेदन-आदर्श-आस्वाद-वार्ताः जायन्ते।
tataḥ prātibha-śrāvaṇa-vedana-ādarśa-āsvāda-vārtāḥ jāyante।

37 ते समाधौ उपसर्गाः व्युत्थाने सिद्धयः।
te samādhau upasargāḥ vyutthāne siddhayaḥ।

38 बन्ध-कारण-शैथिल्यात् प्रचार-संवेदनात् च चित्तस्य पर-शरीर-आवेशः।
bandha-kāraṇa-śaithilyāt pracāra-saṃvedanāt ca cittasya para-śarīra-āveśaḥ।

39 उदान-जयात् जल-पङ्क-कण्टक-आदिषु असङ्गः उत्क्रान्तिः च।
udāna-jayāt jala-paṅka-kaṇṭaka-aādiṣu asaṅgaḥ utkrāntiḥ ca।

40 समान-जयात् ज्वलनम्।
samāna-jayāt jvalanam।

41 रोत्र-आकाशयोः सम्बन्ध-संयमात् दिव्यं श्रोत्रम्।
śrotra-ākāśayoḥ sambandha-saṃyamāt divyaṃ śrotram।

42 काय-आकाशयोः सम्बन्ध-संयमात् लघु-तूल-समापत्तेः च आकाश-गमनम्।
kāya-ākāśayoḥ sambandha-saṃyamāt laghu-tūla-samāpatteḥ ca ākāśa-gamanam।

43 बहिः अकल्पिता वृत्तिः महा-विदेहाः ततः प्रकाश-आवरण-क्षयः।
bahiḥ akalpitā vṛttiḥ mahā-videhāḥ tataḥ prakāśa-āvaraṇa-kṣayaḥ।

44 स्थूल-स्वरूप-सूक्ष्म-अन्वय-अर्थवत्त्व-संयमात् भूत जयः।
sthūla-svarūpa-sūkṣma-anvaya-arthavattva-saṃyamāt bhūta jayaḥ।

45 ततः अणिमा-आदि-प्रादुर्भावः काय-सम्पत्-तत्-धर्म-अनभिघातः च।
tataḥ aṇimā-aādi-prādurbhāvaḥ kāya-sampat-taṭa-dharma-anabhighātaḥ ca।

46 रूप-लावण्य-बल-वज्र-संहननत्वानि काय-सम्पत्।
rūpa-lāvaṇya-bala-vajra-saṃhananatvāni kāya-sampat।

47 ग्रहण-स्वरूप-अस्मिता-अन्वय-अर्थवत्त्व-संयमात् इन्द्रिय-जयः।
grahaṇa-svarūpa-asmitā-anvaya-arthavattva-saṃyamāt indriya-jayaḥ।

48 ततः मनोजवित्वं विकरण-भावः प्रधान-जयः च।
tataḥ manojavitvaṃ vikaraṇa-bhāvaḥ pradhāna-jayaḥ ca।

49 सत्त्व-पुरुष-अन्यता-ख्याति-मात्रस्य सर्व-भाव-अधिष्ठातृत्वं सर्व-ज्ञातृत्वं च।
sattva-puruṣa-anyatā-khyāti-mātrasya sarva-bhāva-adhiṣṭhātṛtvaṃ sarva-jñātṛtvaṃ ca।

50 तत्-वैराग्यात् अपि दोष-बीज-क्षये कैवल्यम्।
tat-vairāgyāt api doṣa-bīja-kṣaye kaivalyam।

51 थानि-उपनिमन्त्रणे सङ्ग-स्मय-अकरणं पुनः अनिष्ट-प्रसङ्गात्।
sthāni-upanimantraṇe saṅga-smaya-akaraṇaṃ punaḥ aniṣṭa-prasaṅgāt।

52 षण-तत्-क्रमयोः संयमात् विवेकजं ज्ञानम्।
kṣaṇa-tat-kramayoḥ saṃyamāt vivekajaṃ jñānam।

53 जाति-लक्षण-देशैः अन्यता-अनवच्छेदात् तुल्ययोः ततः प्रतिपत्तिः।
jāti-lakṣaṇa-deśaiḥ anyatā-anavacchedāt tulyayoḥ tataḥ pratipattiḥ।

54 तारकं सर्व-विषयं सर्वथा-विषयम् अक्रमं च इति विवेकजं ज्ञानम्।
tārakaṃ sarva-viṣayaṃ sarvathā-viṣayam akramaṃ ca iti vivekajaṃ jñānam।

55 सत्त्व-पुरुषयोः शुद्धि-साम्ये कैवल्यम् इति।
sattva-puruṣayoḥ śuddhi-sāmye kaivalyam iti।

Closing

इति पतञ्जलि-विरचिते योग-सूत्रे तृतीयः विभूति-पादः।
iti patañjali-viracite yoga-sūtre tṛtīyaḥ vibhūti-pādaḥ।